Gyanshauryam, International Scientific Refereed Research Journal
© 2023 GISRRJ | Volume 6 | Issue 3 | ISSN : 2582-0095

# प्राच्यमूल्यानि

ममता
असि.प्रोफेसर, शिक्षापीठ, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय, नवदेहली।

**Article Info**
Volume 6, Issue 3
Page Number : 86-88

**Publication Issue :**
May-June-2023

**Article History**
Accepted : 01 June 2023
Published : 12 June 2023

**शोधसारांश:-** शिक्षा सर्वेषां प्राच्यमूल्यानां तत्र धार्मिकं, नैतिकं, राजनीतिकं, सामाजिकं, सर्वविधमूल्यानां सर्वाङ्गीणविकासाय महत्त्वपूर्णां भूमिकां निर्वहति। अर्वाचीनेऽस्मिन् काले शिक्षा येन दर्शनेन स्वपरिदर्शनं करोति तद्दर्शनमेव पाश्चात्यदर्शनमिति कथ्यते। तत्र आदर्शवादे मूल्यं नाम सत्यं शिवं सुन्दरमिति उक्तमस्ति। एतेतेषां मूल्यानां प्राप्तये नैतिकं सज्जीवनं नूनमेव अपेक्षितं भवति। नैतिक सज्जीवनाय संयम:, धैर्यं, ज्ञानं, न्याय: इत्येतेषामपेक्षा भवति। अस्य वादस्य वेत्ता प्लेटो अन्ये च स्वीकुर्वन्ति यत् मानव व्यक्तित्वस्य विकास: आत्मबोधेनैव जायते।

**मुख्यशब्द:** – शुभाशुभगमनं, कार्याकार्यावगमनं, धर्मार्थावगमनं, मनसि प्राच्यमूल्यानि।

प्राच्यै: पाश्चात्यैरुभयोरपि मुक्तकण्ठेन स्वीक्रियते यत् मानवचरित्रस्यनिर्माणारम्भ:आद्यावस्थात: भवति एवञ्च चरित्रनिर्माणे धर्माणामादर्शाणां मूल्यानाञ्च स्थानं ज्ञानविज्ञानेन सह महत्त्वपूर्णं भवति। मानवव्यक्तित्वस्य मानकं नूनमेव दर्शनमूल्येषु सन्निहितानि भवति।मानव: कामपि क्रियां विचारं वा वस्तुस्वीकरणात् प्राक् नूनमेव कुरुते, यत् तत् ग्राह्यं त्याज्यं वा। यदा एतादृश: निर्णयात्मक: विचार: मानवस्य मनसि निर्णयात्मकरीत्या आगच्छन्ति तदा तेषां विषये शुभाशुभगमनं, कार्याकार्यावगमनं, धर्मार्थावगमनं, कर्तव्याकर्तव्यावगमादीनि निर्गतानि तथ्यानि मूल्यमुच्यते। येन तस्य व्यक्तित्वं तस्मिन् खलु परिवेशे जायमानं भवति। एवञ्च जनानपि आकर्षयन्ति।

संस्कृतभाषायां मूलमिति शब्देन यत् प्रत्यये कृते सति प्रातिपदिकत्वात् मूल्यं निष्पद्यते। यस्यार्थो भवति प्रतिष्ठायोग्यार्थात् येन मानव: प्रतिष्ठामाप्नोति तत् मूल्यमुच्यते। शब्दव्युत्पत्तिदृष्ट्या तु मूलेन अवगम्यते अभिभूयते, मूलेनसमं तत् मूल्यमित्ययभिधीयते। वस्तुतस्तु स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा:। अनया रीत्या मूल्यन्तु मानवस्य अस्तित्वस्य वा सत्ताया: कस्यापि महत्त्वपूर्णवस्तो: प्रतिनिधित्वं सम्पादयन्ति।

मानव: जन्मन: आरभ्य: मृत्युपर्यन्तं यत्किमपि अनुभवति वा आप्नोति ता: सर्वा: शिक्षा नाम्ना विश्वतोमुखेनाभिधीयते। स्वविकासक्रमे स: नानाभि: परिवेशै: सह संसर्गं सम्प्राप्य नैकानुभवान् प्राप्नोति। यै: स्वव्यवहारपरिमार्जनं कृत्वा समाजस्य सम्मुखे स्वोन्नतं व्यक्तित्वं समुपस्थापयितुं शक्नोति। वस्तुतस्तु मानवव्यक्तित्वस्य वैशिष्ट्यं येन उद्घोष्यते तत् मूल्यमुच्यते। एतदेका एतादृशी आचारसंहिता सद्गुणानां समावेशोऽस्ति, यस्य ग्रहणेन मानवस्य व्यक्तित्वमाभामयं भवति, तथा च स: समाजे सर्वत्र दुर्जनं परित्यज्य प्रभावपूर्णमुच्चस्थानं प्राप्नोति। निष्कर्षकत्वेन कथयितुं शक्यते यत् मूल्यन्तु मानवन्त: नियन्त्रिता किञ्चित् तेज: गुणविशेषं वा भवति। विषयेऽस्मिन् दार्शनिकाणां चिन्तनं यत् मूल्यं केनापि मानवेन वस्तुना सह सम्बन्धितं नैव भवति अपितु मूल्यं विचारेण, दर्शनेन सह सम्बन्धितं भवति। इत्युक्ते मानवस्य जीवनं येनादर्शेण सुगमतामाप्नोति तत् मूल्यमिति।नीतिशास्त्रानुसारेण या: क्रिया: वा वस्तूनि अस्माकं आत्मन: पूर्णताया: सम्पादने सहायका: भवन्ति, ता: सर्वा: क्रिया: तानि सर्वाणि वस्तूनि मूल्यमिति पदेनाभिधीयते। मनोवैज्ञानिकानां मते येन

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अस्मदीयेच्छां पूर्णतां प्रति याति प्राप्नोति च तत् मूल्यमिति। प्राच्यमनीषायां जीवनं संरक्षयितुम् अभ्युदयातमकं च कर्तुं केचन नियमोपनियमा: सन्ति। ते नियमा: तस्य समाजस्य आधारसंहिता: भवन्ति। येषां सम्यगनुपालनेन स: सामाजिको जायते।वस्तुतस्तु मूल्यं तदादर्श: तादृश: विश्वासो मानकोऽस्ति यस्यानुसरणेन समाज: कार्यं कुरुते।

मानवजीवनलक्ष्यै: सह अस्य साक्षात् सम्बन्धोभवति। अनेन नूनमेव वस्तूनामादर्शानां प्रयोजनानां च महत्त्वविषये विचार: क्रियते। अस्माकमाचरणं मूल्यै: प्रेरिता: भवन्ति। अस्य मूल्यस्य निर्णयोऽपिमानसिकस्तरे गृह्यते। मूल्येषु वैयक्तिता, वस्तुनिष्ठता, मूर्तामूर्तता, आर्द्रता, विशेषताश्च भवन्ति। एतादृशं महत्त्वात्मकं मूल्यं तर्काभावे अन्ध:, भावाभावे आशक्त: व्यवहाराभावे रक्तो भवति। यद्यपी मूल्यं संवेगं न भवति तथापि तस्मिन् इच्छा: भावाश्च सन्निहिता: भवन्ति।

सृष्ट्यारम्भकालाद् वा ऋत् कालादेव प्राच्या: मानवा: शिष्टा: सभ्याश्च भवन्ति। तत्र मूलकारणं स्वचरित्रमिति। इदं नूनमेव शाश्वतमिति कथयितुं शक्यते।भगवता मनुना निगदितं यत्–

**एतद्देश प्रसूतस्य सकाशादग्रजन्मन:।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा:।।**

प्राच्यमनीषाया: प्रथमाचारसंहिता वेद इति सर्वे मुक्तकण्ठेन स्वीकुर्वन्ति। तत्र मानवजीवनम् अभ्युदयाय वर्धनाय च अनेके संज्ञानेन, सत्ताया: लाभेन, विचारेण, चित्ताख्यानेन मोक्षेण च सम्बद्धा नियमोपनियमा: वर्णिता: सन्ति। प्राधान्यत्वेन ते भवन्ति धर्मादर्शमूल्यानि चेति। उक्तानां धर्मादर्शमूल्यानां नूनमेव विवेचनमाकलनं शिक्षायां सृष्टिसिद्धान्ते च दर्शनेन क्रियते। प्राच्यानां मानदण्ड: मूल्यसन्दर्भे वेदाधारित: धर्म: तदाधारित: आदर्श: एवञ्च उभयो: सम्बद्धंमूल्यमिति यतोहि अस्यां मनीषायां या परं सत्तास्ति सा एव मूल्यस्य आदर्शरूपा।वस्तुतस्तु दर्शनेन जीवनं प्रति निर्णीतं ज्ञानमेव मूल्यमुच्यते। अनेन मूल्येन एव मानव: जीवनस्य लक्ष्यं मोक्षं च प्राप्नोति। परं सत्तायां विलीनताञ्चाप्नोति।

अर्वाचीनेऽस्मिन् काले भारतीयमूल्यानां वा प्राच्यमूल्यानां संरक्षणाय संवर्धनाय च कटिबद्धास्सन् सर्वकार: समबद्धमन्त्रालयश्च आदिवारात्रिं कर्म करोति। वस्तुत: सर्वेषां विकासे शिक्षा महत्त्वपूर्णां भूमिकां निर्वहति। शिक्षा सर्वेषां प्राच्यमूल्यानां तत्र धार्मिकं, नैतिकं, राजनीतिकं, सामाजिकं, सर्वविधमूल्यानां सर्वाङ्गीणविकासाय महत्त्वपूर्णां भूमिकां निर्वहति। अर्वाचीनेऽस्मिन् काले शिक्षा येन दर्शनेन स्वपरिदर्शनं करोति तद्दर्शनमेव पाश्चात्यदर्शनमिति कथ्यते। तत्र आदर्शवादे मूल्यं नाम सत्यं शिवं सुन्दरमिति उक्तमस्ति। एतेतेषां मूल्यानां प्राप्तये नैतिकं सज्जीवनं नूनमेव अपेक्षितं भवति। नैतिक सज्जीवनाय संयम:, धैर्यं, ज्ञानं, न्याय: इत्येतेषामपेक्षा भवति। अस्य वादस्य वेत्ता प्लेटो अन्ये च स्वीकुर्वन्ति यत् मानव व्यक्तित्वस्य विकास: आत्मबोधेनैव जायते। अत: सार्वभौमिकमूल्यै: युक्तम् अस्माकं जीवनं स्यादिति। इदानीन्तने काले NEP-2020 तथा च NCF-2023इत्यत्र नीते: क्रियान्वयनमेव शिक्षाया: परमं लक्ष्यमस्ति बालाकानां व्यक्तित्वस्य तथा च सर्वाङ्गीणविकासाय इदम् उद्घोषितमस्ति, सार्वभौमिकलक्ष्यानाम् आत्मीकरणमपि अत्रैव सन्निहितं वर्तते। यथार्थवादिन: अपि स्वदर्शनस्य मूल्यविषयात्मिकां सत्तां प्रतिपादयन्ति। ते कथयन्ति यत् मानवव्यवहारस्य आचाराय प्रकृतिपदत्ता: विचारा: एव मूल्यानि भवन्ति। अनेन प्रकारेण प्रयोजनवादिन: अपि कथयन्ति यत् सर्वेषां विचारणां सिद्धान्तानां अन्तिमा परीक्षा कल्याणे एव भवति। वस्तुतस्तु जनसुखाय मूल्यानां विकास: बालकेषु कर्तव्य:।

The until test all ideas principles of ethical institutions is their ability to make good.

मूल्यानि आदर्शाधारितानि भवन्ति, अत्र प्रसङ्गे भगवता जैमिनिना सूत्रत्वेन कर्मण: लक्षणं प्रकथितम्– 'चोदनालक्षणोऽर्थो धर्म:' इति। अस्मिन् अर्थे भगवता मनुना निगदितं यत्–

**धृति: क्षमा दमोऽस्तेयं शौचं इन्द्रियनिग्रह:।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**

धर्मलक्षणे उक्तानि एतानि दशकानि धर्मलक्षणानि नूनमेव छात्राणां, शिक्षकाणां, प्रशासकानां, कर्मचारीणां, प्रबन्धकानां, तथा च सर्वेषां मानवानां शाश्वतमूल्येषु गण्यन्ते।

एतेषां मूल्यानां मुख्यत्वेन पाठ्यचर्यायां स्थानप्रदानेन छात्राणां व्यक्तित्त्वं नूनमेव आभामयं भविष्यति। अनेन प्रकारेण प्राच्यमूल्यानां विषये निगदितं यत्– क्षमा, सत्यं, दमः, शौचं, संयमः, इन्द्रियनिग्रहः, इत्येतानि धर्मयुक्तानि मूल्यानि सन्ति, अस्मिन्नेव उपक्रमे यदा वयं धर्मस्य विश्लेषणं धारणम् आकलनं कुर्मश्चेत् प्राच्यमूल्यानि दृष्टिगोचराणि भवन्ति। तद्यथा–

**पात्रे दानं मतिः कृष्णे मातापित्रोश्चपूजनम्।**

**श्रद्धा बलिर्गवां ग्रासः षड्विधं धर्मलक्षणम्।।**

अत्रापि पात्रे दानं, भगवद्भक्तिः, पित्रोः पूजनम्, श्रद्धा, समपर्णम् इत्येतानि मूल्यानि उक्तानि सन्ति। उपनिषदादिषु मातृदेवो भव, पितृदेवो भव,आचार्यदेवो भव,इत्यादीनि मूल्यानि उक्तानि सन्ति। अनेन प्रकारेण धर्मात् तथा च मूल्यात् यत् ज्ञानं अस्माभिः प्राप्यते, तेषां संरक्षणं शिक्षया एव सम्भाव्यते। शिक्षा एव विभिन्नप्रकियाभिः सर्वं प्राप्तये सहायिका भवति। यतोहि सार्वभौमिकमूल्यानां प्राच्यमूल्यानां च कारणेन व्यक्तित्वस्य सर्वाङ्गीणविकासाय बालकाः सक्षमाः भवेयुः।

**श्रूयतां धर्म सर्वस्वं श्रुत्वा चैवावधार्यताम्।**

**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**

सर्वान्ते शाश्वतप्राच्यमूल्यानि–

**अयं निजः परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

**एवमेव सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः इति।**

**सन्दर्भ ग्रन्थ सूची-**

1. National curriculumframework for school education 2023, N.C.E.R.T New Delhi.
2. राष्ट्रीय शिक्षा नीति –2020 शिक्षा मन्त्रालय, भारत सरकार।
3. मणिः डॉ. वाचस्पति नाथ झा "शिक्षायाः दार्शनिकसामाजिकाधाराः" वर्षम्, 2018, प्रथम संस्करण, पोद्दार पब्लिकेशन, तारा कालोनी, छित्तूपुर, वाराणसी।
4. मणिः डॉ. वाचस्पति नाथ झा, पाठ्यचर्या विद्यालयश्च, वर्षम्–2016, प्रथम संस्करण, वीर बहादुर पब्लिकेशन, साउथसिटी, रायबरेली रोड, लखनऊ।
5. वर्मा वैद्यकाश, अधिनीति शास्त्र के मुख्य सिद्धान्त, एलाइड पब्लिशर्स, प्राइवेट लिमिटेड, वर्ष– 1987, प्रथम संस्करण, नईदिल्ली।
6. शर्मा.आर,ए. मानव मूल्य एवं शिक्षा आर. लाल. बुक डिपो, मेरठ।